A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 15th & 16th , Vol - IV ISSN 976-8645

# ''नाट्यशास्त्रानुसारं रङ्गमंचस्य सैद्धान्तिकविवेचनम्''

अंजना कुमारी[3]

*अस्मिन् शोधपत्रे मया नाट्यशास्त्रे विवेचितं रङ्गमंचस्य सैद्धान्तिकरूपेण वर्णनं कृतमस्ति। यद्यपि नाट्यशास्त्रे 'रङ्गमंचः' इति शब्दः न उपलभ्यते। रङ्गमंचस्य स्थाने रङ्गशीर्षरङ्गपीठशब्दयोः प्रयोगः कृतोऽस्ति। परन्तु तस्मिन् काले रङ्गमंचस्य सा एव स्थिति आसीत् यद् अद्यत्वे वर्तते। आधुनिककाले तकनीकीप्रयोगेण अस्मिन् किंचित् परिवर्तनं वर्तते परन्तु मूलरूपेण रङ्मंचः तथा एव अस्ति यथा भरतमुनेः समये आसीत्।*

*अस्मिन् शोधपत्रे नाटकं रङ्गमंचीय सम्बन्धानां परस्परम् अल्परूपेण वर्णनं कृतमस्ति। यत् कथम् असौ परस्परम् अन्योऽन्याश्रितमस्ति। रङ्गमंचः बाह्य संसारस्य आधारः अस्ति। यतोहि रङ्गमंचे मानव–जीवनस्य नित्यघटितघटनानां प्रदर्शनं क्रियते। कोऽपि नाटकं तावत् पर्यन्तं सफलीभूतं न मन्यते यावत् पर्यन्तं तस्य प्रदर्शनं रङ्गमंचस्य उपरि न क्रियते। प्रेक्षकः एव नाटकस्य गुणदोषानां साक्षी भवति। रङ्गमंचः जनसाधारणानां मनोरंजनस्य साधनमस्ति। यतोहि नाटकस्य प्रदर्शनं रङ्गमंचे भवति, तथा दर्शकाः एकस्मिन् स्थले एकत्रीभूत्वा रङ्गमंचे नाटकं पश्यन्ति। रङ्गमंचः मानवजीवनस्य दर्पणमस्ति तथा येन माध्यमेन वयं समाजे सुगमतया परिवर्तनं कर्तुं शक्नुमः।)*

मानवजीवनस्य मूलप्रवृत्तिः भावनानाम् अभिव्यक्तिरस्ति तथा भावनानां अभिव्यक्तेः साधनं नाटकम् अस्ति। मानवः नाटकं रंगमंचस्योपरि प्रस्तुत्य स्वकीय विचारान् अभिव्यक्तिं च जनमानसे प्रेषयति। नाटकस्य तथा रंगमंचस्य परस्परं अन्योन्याश्रितः सम्बन्धरस्ति। रङ्गमंचः राष्ट्रस्य प्रतीकमस्ति। नाटकं तावत् पर्यन्तं सफलीभूतं न मन्यते, यावत् पर्यन्तं तस्य प्रस्तुतिकरणं रङ्गमञ्चस्योपरि न क्रियते। 'नाटकं+रङ्गमंचः' एकः क्लिष्ट – विविधायामी – अनुकरणमूलक – सामूहिकी – रङ्गमंचस्य कलाः सन्ति। अस्मिन् जीवनतथ्यानाम् उद्घाटनस्य क्षमता अस्ति।

रङ्गमंचः शब्दद्वयानां मेलनेन जातम्– 'रङ्गः तथा मंचः।' 'मंच' शब्देन अभिप्रायः स्थानविशेषेन अस्ति, यत्र सुव्यवस्थित–सुचारूरूपेण अभिनयं क्रियते तथा 'रङ्ग' शब्देन अभिप्रायः सौन्दर्यप्रसाधानसाधनैः, वर्णप्रकाशव्यवस्थाभिः, विविधप्रकाराणां जवनिकाभिः तथा वस्त्रैः नास्ति। 'रङ्ग' जीवनस्य विविधस्थितिभिः सम्बन्धितोऽस्ति, यं वयं दृश्य–काव्यस्य (नाटकस्य) माध्यमेन मंचे क्रियानुभूताः पश्यामः।[1] जीवनस्य व्याख्याकरणं 'रङ्गमंचस्य' मूलोद्देश्यमस्ति।

नाटकं मानवजीवनं सम्पूर्णतया चित्रितं करोति। नाटकस्य चाक्षुषप्रतीते आधारः रङ्गमंचोऽस्ति। रङ्गमंचः नाटकस्य निकषमस्ति। नाटकं दर्शकानां दृष्टे उत्तम् अनुत्तमं वा अस्य निर्णयं रङ्गमंच एव करोति।

यद्यपि रङ्गमंच+शब्दस्य प्रयोगः भरतस्य नाट्यशास्त्रे नास्ति तदपि भरतमुनिः रङ्गमंचशब्दस्य स्थाने 'रङ्गपीठं तथा 'रङ्गशीर्ष' शब्दैः रङ्गमंचस्य प्रत्यारोपणं कृतवन्तः। भरतकालीन समाजे वर्ग–वैषम्यानाम् आधिक्यम् आसीत्। निम्नवर्गाणां जनाः उच्चवर्गाणां प्रतिष्ठाजन्यैः आयोजनैः सम्मिलितं भवितुं न शक्नुवन्ति स्म। येन उच्चवर्गीय–निम्नवर्गीयजनेषु विद्वेषभावना उत्पन्ना जाता।[2] येन सामाजिक–व्यव्यवस्थां सामान्यकरणाय नूतनमार्गस्य आवश्यकता अनुभूता। एतदर्थं ब्रह्मणा शूद्रादिनां सर्ववर्गाणां कृते उपयोगी पंचमवेदः 'नाट्यवेदस्य' उत्पत्तिः कृता।[3] नाटकस्य विघ्ननिवारणाय नाट्यगृहस्य निर्माणं कृतवन्तः। नाट्यगृहस्य विभाजनं विकृष्टचतुस्रत्र्यस्रत्रिप्रकारेषु कृतम्। त्रिप्रकाराणाम् अपि विभाजनं ज्येष्ठमध्यमावररूपेण कृतम्।[4] एवं नवप्रकाराणां नाट्यमण्डपानाम् चर्चा भरतमुनेः नाट्यशास्त्रे अस्ति। येषु ज्येष्ठस्य प्रयोगः देवानां कृते, मध्यमः राजानां कृते तथा अवरः सामान्यजनानां कृते प्रयुक्तः भवति।[5] ज्येष्ठमण्डपस्य परिमाणः 108 हस्तः, मध्यमः 64 हस्तः तथा अवरः 32 हस्तः भवति।[6]

विकृष्टरंगमंचः आयाताकारः, चतुरस्र वर्गाकारः, त्र्यस्र त्रिभुजाकरो भवति। नाट्याचार्यभरतमुनिः नाट्यगृहं द्विभागेषु विभक्तं करोति। रङ्गमंचस्य अर्धभागः रङ्गपीठरङ्गशीर्षश्च भवति तथा अन्यार्धभागे प्रेक्षागृहस्य निर्माणं क्रियते। प्रेक्षकस्य समीपे यद् स्थानं भवति तद् रङ्गपीठमुच्यते तथा रङ्गमंचस्य पृष्ठभागः रङ्गशीर्षमुच्यते। रङ्गपीठरङ्गशीर्षस्य पृष्ठभागे नेपथ्यं तथा द्विद्वाराणां विधानमस्ति।[7] नेपथ्यस्य प्रयोगं न केवलं पात्राणां सज्जा तथा ध्वनिप्रभावानां कृते भवति, परन्तु वर्जितदृश्यानां कृतेऽपि असौ उपयोगी सिद्धयति। यतोहि वर्जितदृश्यानां प्रयोगः संस्कृतनाटकेषु निषेधोऽस्ति।[8]

---

[3] पी–एच.डी. शोधच्छात्रा (नेट/जे.आर.एफ) संस्कृत–विभागः पंजाब–विश्वविद्यालयः, चण्डीगढ़म्

प्रेक्षागृहस्य विभिन्नस्थानैः नानाविधदेवानां पूजा भवति स्म।[9] आरम्भिकपूजनं 'पूर्वरङ्गः' उच्यते तथा अन्तिमांशः 'नान्दी'। यस्य प्रयोगः अद्यापि संस्कृतनाटकेषु क्रियते।

नाट्यशास्त्रानुसारं रङ्गमंचे वेदिकायाः बाहुद्वये पूर्वनिर्दिष्टप्रमाणः तथा विधे अनुसारं चतुरस्तम्भैः युक्तः 'मत्तवारणी इति' निर्माणं भवितव्यम्।[10] यतोहि 'मत्तवारणी' नाटकप्रस्तुतिः समये अकस्मात् आगतविघ्नान् निवारयति। नाटकस्य मध्ये यस्य पतनम् अशुभं भवति।

प्राचीनकाले भारते त्रयप्रकारमंचाः भवति स्म – 'समतलबहुधरातलीय– मुक्ताकाशश्च।' येषु समतलमंचः तथा द्विभूमीयः अर्थात् बहुधरातलीयः मंचः आदौ निम्नः तथा उत्तरोतरं क्रमशः उच्चः भवति स्म। यस्य वर्णनं नाट्यशास्त्रेऽस्ति। तृतीयः मुक्ताकाशमंचः लोकमंचः भवति स्म।

प्राचीनकाले जनसमूहः एकस्मिन् निश्चितस्थाने एकत्रीभूय रिक्ताकाशस्य नीच्चैः नाट्यप्रदर्शनं कुर्वन्ति स्म। सैव मंचः मुक्ताकाशः भवति स्म।

भरतमुनिना समतलमंचं सर्वश्रेष्ठम् अङ्गीकृतम् तथा कूर्मपृष्ठवत् मंचस्य निषेधं कृतम्।[11] तैः द्विभूमीयनाट्यमण्डपं शैलगुह्याकृतेः निर्माणस्य निर्देशं कृतम्। यतोहि अस्मिन् मन्दवायुः प्रवहति। असौ बहुवायुवेगेन विरहितः तथा च गम्भीरशब्दैः गुञ्जायमाणः भवति, अर्थात् अस्मिन् उच्चारितशब्दाः प्रतिध्वनिताः भवन्ति।[12] मुक्ताकाशंमचे आधुनिककाले रामलीला, रासलीला– नौटंकी – इत्यादयः लोकनाट्यानि दृश्यते।

संस्कृतरङ्गमंचः यथार्थवादी आदर्शवादी चासीत्। अस्मिन् घृणोत्पादकः अथवा उद्वेगजनकदृश्यानां प्रदर्शनं सर्वथा वर्जितम् आसीत्। नाटकरङ्गमंचयोः परस्परं घनिष्ठसम्बधरस्ति। सम्पूर्णसंसारस्य घटनानां चित्रणं नाटके भवति, यस्य प्रस्तुतिकरणं रङ्गमंचस्य माध्यमेन भवति। रङ्गमंचः सामाजिक–गुणदोष – राजनीति – धर्मोऽस्ति। असौ शिक्षा तु प्रददति एव तथा सार्धमेव मनोरंजनमपि करोति। आदिमानवकालत् आधुनिकालपर्यन्तं मानवजीवनस्य घटनानां वर्णनं रङ्गमंचमाध्यमेन भवितुमर्हति।[13] आदिमानवः आदिवसम् आखेटं करोति स्म तथा रात्रौ स्वकीय संस्मरणान् प्रकटयितुं कुत्रचित् एकस्मिन् स्थले जनसमूहः एकत्रितः भवति स्म। तेषां संस्मरणान् अभिव्यक्तभूमिः रङ्गमंचस्य रूपं धरति। सः स्वकीयप्रसन्नतया नृत्यति स्म, गायति स्म। तदेव अद्यापि नाटकस्य अङ्गमस्ति। आदिमानव प्रकृतेः बहु सम्मानं करोति स्म। अतः तेन क्षेत्र–चौपाल–वन–उपवन– इत्यादिकं सर्वं रङ्गमंचरूपेण प्रयुक्तम्।[14] नाटकस्य यदा रङ्गमंचे अभिनयं भवति तदा तस्मिन् जीवनस्य सम्पूर्णभावरसकर्मावस्थानां समाहारो भवति।[15] तस्मिन् चरित्रगत् कृतीनां तथा उक्तिकथ्यानां दर्शकानां मनसि रूपाकारधारणं करोति। चरित्रगत् रामरावणं तस्य कृते रामायणस्य रामरावणयोरनुभूतिः कारयति। नाटकं केवलमात्रं व्यक्तिगतजीवनस्य व्याख्या एव नास्ति, अपितु राष्ट्रसांस्कृतिकजीवनस्य एवं सामाजिकलोकजीवनस्य दर्पणं भवति।[16] रङ्गमंचः गतिशीलक्रियाशीलजीवनं प्रस्तौति। यदि नाटकम् आत्मास्ति तर्हि रङ्गमंचः देह अस्ति। यथा शरीरेण बिना आत्मनः स्वरूपमं न भवति तथैव रङ्गमंचेन बिना नाट्यस्य कल्पना भवितुम् नर्हति। रङ्गमंचमाध्यमेन समाजे सुगमतया परिवर्तनं कर्त्तुं शक्नुमः। रङ्गमंचः समाजं यथार्थजीवनं प्रति आनयति।

संस्कृतरङ्गमंचस्य सुदीर्घा परम्परा सिद्धयति यत् असौ परम्परारूपेण सर्वाधिकप्राचीना, सर्वतोभावेनविकसिता एवं च समृद्धा परम्परा अस्ति।[17] नाटकस्य माध्यमेन जीवनस्य स्थितिः प्रदर्शयते। प्रत्येकनाटकस्य स्वकीयः रङ्गमंचः सार्धमेव उत्पद्यते। नाट्यरचनायाः विधानं यद्यपि केनापि प्रकारेण कृतः भवेत् परञ्च यावत् पर्यन्तं तस्य मूल्याङ्कनं जीवनसन्दर्भेण न भवेत् तावत् पर्यन्तं रचनाविधानस्य आतंरिक सौष्ठवः कदापि स्पष्टः न भविष्यति।[18]

रङ्गमंचः जनानां परस्परं सम्बन्धस्थापनस्य साधनमपि आसीत्। यतोहि नाटकस्य मंचनम् एकस्मिन् निश्चितस्थाने भवति स्म। जनाः नाटकं द्रष्टुं तत्र एकत्रिताः भवन्ति स्म। यत् तेषां पारस्परिकसम्बधान् सुदृढं करोति स्म। रङ्गमंचे यदा नाटकस्य अभिनयं भवति, तदा प्रेक्षकः तस्य गुणदोषानां परिशीलनमपि करोति। नाटकं प्राचीनकालादेव मनोरंजनस्य साधनमासीत्। जनाः आदिवसं कार्यं कुर्वन्ति स्म तथा रात्रौ श्रान्तता दूरीकरणस्य साधनं नाटकस्य रङ्गमंचीय प्रस्तुतीकरणमासीत्। यदा नाटकं रङ्गमंचे प्रस्तूयते, तदा सामाजिकजनाः स्वदुःखान् विस्मृत्य नाटकस्य आनन्दं ग्राह्यन्ति तथा रसानुभूयन्ते। रङ्गमंचे तदेव नाटकं सफलं भवति यस्य अधिकाधिकसम्बन्धः मानवजीवनस्य प्रतिदिनं घटितघटनाभिः भवति। रङ्गमंचः कस्याः कलायाः नाम नास्ति, अपितु समस्तललितकलानां समूहोऽस्ति। यस्मिन् काव्य–संगीत चित्रकला–स्थापत्य–इत्यादिसर्वकलानां सन्निवेशः भवति।[19] रङ्गमंचः सामाजिक जीवनस्य दर्पणमस्ति। असौ

सामाजिकघटनानां प्रस्तौता अपि अस्ति। आधुनिकयुगे सामाजिक समस्याम् उद्धर्त्तुं रङ्गमंचः सुष्ठुः साधनोऽस्ति। संस्कृतस्य अधिकतरनाटकानि रङ्गमंचे प्रस्तुतानि। कोऽपि नाटककारः तत्कालीनपरिस्थितेरनुसारं नाटकं रचयति। रङ्गमंचः तान् सर्वान् प्रस्तौति।

नाटकं यदा रङ्गमंचे प्रस्तूयते तदा असौ सूत्ररूपेण बद्धं भवति। यस्मिन् नाटककार– सूत्रधार– रङ्गकर्मी– अभिनेता– दर्शकाः, सर्वे सम्मिलिताः भवन्ति। यस्मिन् एकोऽपि चेत् त्रुटिः करोति, तदा नाटकम् असफलं भवितुं शक्नोति। रङ्गसङ्केतानाम् अभावेन नाटके परिवर्तनं कर्त्तुं शक्नुमः। भाषा–सम्वाद–मंचीयप्रस्तुतेः यदा उचितसामंजस्य न भवति तदा परिवर्तनस्य आवश्यकता भवति अथवा रङ्गमंचस्य आवश्यकतानुसारं तस्मिन् योजनमपि कर्त्तुं शक्नुमः।

नाटककारस्य दृश्यात्मकपरिकल्पना मनसः अमूर्तरंङ्गमंचेन अवतीर्य नाटकप्रदर्शनसमये मंचे मूर्तरूपं गृह्यणाति। नाटके दृश्यानां परिवर्तनं बहुबारं भवति, परन्तु रङ्गमंचः सदैव एकदृशमेव भवति।

नाट्यशास्त्रानुसारं रङ्गमंचस्य सज्जा काष्ठकर्मेण भवति। यस्मिन् गज–सर्पादिनाम् आकृत्याः भवेयुः। काष्ठे नानाप्रकाराणां वेदिकाः शोभितचित्राणि, कपोतानां छत्रम् इत्यादिकम् अपेक्षितं भवति।[20] काष्ठकर्मस्य पश्चात् चित्रकलायाः स्थानमस्ति। पूर्वं भित्तेः श्वेतचूर्णस्य लेपनं कृत्वा तस्मिन् स्त्रीपुरुषाणां चित्राणि, लताबन्धानि, विविधक्रीडानां चित्राणि अङ्कितानि भवेयुः।[21] रङ्मंचसज्जायै जवनिकायाः प्रयोगं क्रियते। असौ विविधवर्णयुक्ता भवेत्। ध्वनिप्रयोगेण दृश्यपरिवर्तनाय सहायतां भवति। रङ्गमंचः युगाविशेषस्य जनरूचिः तथा च तत्कालीनार्थिकव्यवस्थाधारेण निर्मितं भवति। विभिन्नदेशानां नाटकानां तथा रङ्गमंचानां ऐतिहासिकाध्ययेन स्पष्टं भवति यत् यथावसरं नाटककाराः तथा च रङ्गमंचस्य उन्नायकाः स्वकीय सामाजिकोत्तरदायित्वानां पालनं कृतवन्तः।[22]

रङ्गमंचः समूहगतजीवनस्य पर्यायं प्रतीयते। अस्य निर्माणं, सज्जा तथा अन्याः क्रियाकलापाः सामूहिकप्रयासमुपरि एव अवलम्बिताः सन्ति। एतदतिरिच्य सामान्यविशिष्टपरिस्थितिषु रङ्गमंचस्य आयोजनम् एतदर्थं क्रियते यत् सः सामूहिकचेतनां जागरणाय सहायको भवति।[23] नाटकीयरङ्गमंचेन सामूहिक – भावनायाः प्रचारे अत्यधिकसहायता मिलति। तस्मिन् आचार–विचाराणां प्रदर्शनम् एकस्मिन् एव स्थले भवति। प्रत्यक्षकला तथा मनोरंजनस्य साधनेन परिपूर्णे सति दर्शकानां तस्मिन् विशेषा रूचिः भवति। अतः नाटकं सामूहिक भावनायाः प्रेरणया निर्मितं भवति तथा च समूहगतप्रवृतिं विकसति परिष्करोति च। रङ्गमंचीयता नाटकस्य प्रधानलक्षणमस्ति। रङ्गमंचस्य विशेषता अस्ति यत् असौ समयस्य अल्पतायामपि अधिकानां घटनानां प्रत्यक्षीकरणं कारयति। नाटकीयानुकृतेः स्वभाविकतायाः तथा वास्तविकतायाश्च विकासे सर्वाधिकमहत्त्वपूर्णस्थानं रङ्गमंचस्य एवास्ति।

आधुनिककाले मुख्यरूपेण समस्यानाटकेषु, रङ्गमंचे अधिकाधिकस्वभाविक– घटनानामेवं दृश्यानाम् प्रदर्शनस्य आग्रहमस्ति। अस्य ध्यानम् अवश्यमेव कर्त्तव्यं यत्,– यथा अस्माकं नित्यजीवनं भवेत् तथा एव रङ्गमंचीयजीवनं भवेत्। तयोः परस्परं सम्बन्धः अवश्यमेव भवेताम्। रङ्गमंचस्य माध्यमेन वयं स्वकीयविषयाणां तथा सिद्धान्तानाम् अधिकाधिकप्रदर्शनं कर्त्तुं शक्नुमः।

अस्मिन् शोधपत्रे रङ्गमंचस्य संक्षिप्तरूपेण सैद्धान्तिकवर्णनं कृतमस्ति। असौ शोधपत्रं शोधार्थिनां तथा रङ्गमंचीयजिज्ञासूनां कृते रङ्गमंचस्य अल्परूपेणावबोधनाय सहायकं भविष्यति, इति अहं मन्ये। अस्मिन् शोधपत्रे रङ्गमंचस्य स्थितेः यथासम्भवं वर्णनं कृतमस्ति। यत् असौ रङ्गमंचीयनियमानुसारं सदैव ग्राह्यम् अस्ति।

*सन्दर्भाः –*


*1. सुरेन्द्रवमर्णः नाटकेषु रङ्गमंचीयता– पृ. 15.*

*2. ''ग्राम्यधर्मप्रवृत्तेः तु कामलोभवशङ्गते।*

*ईर्ष्याक्रोधादिसम्मूढे लोके सुखितदुःखिते।'' (ना.शा.–1.19.)*

3. "न वेदव्यवहारोऽयं संश्राव्य शूद्रजातिषु।
तस्मात् सृजापरं वेदं पञ्चमं सार्ववर्णिकम्।।"(ना.शा. 1.12.)

4. "विकृष्टश्चतुरश्रश्च त्र्यश्रश्चैव तु मण्डपः।
तेषां त्रीणि प्रमाणानि ज्येष्ठं मध्यं तथाऽवरम्।।" (ना.शा., 2.8.)

5. "देवानां तु भवेज्ज्येष्ठं नृपाणां मध्यमं भवेत्।
शेषाणां प्रकृतीनां तु कनीयः संविधीयते।।" (ना. शा.–2.11)

6. ना.शा. ( (2.9–10)

7. "कार्यं द्वारद्वयञ्चात्र नेपथ्यगृहकस्य तु।" (ना.शा. 2.74)

8. संस्कृत–आलोचना– पृ. 94.

9. संस्कृत–आलोचना– पृ. 92.

10. "पूर्वप्रमाण – निर्दिष्टा कर्त्तव्या मत्तवारणी।
चतुः स्तम्भसमायुक्ता वेदिकायास्तु पार्श्वतः।।" (ना.शा. 1.103)

11. "कूर्मपृष्ठ न कर्त्तव्यं मत्स्यपृष्ठं तथैव च।
शुद्धादर्शतलाकारं रङ्गशीर्षं प्रशस्यते।।" (ना. शा. 2.77–78.)

12. "कार्यः शैलगुहाकारो द्विभूमिर्नाट्यमण्डपः।
मन्दवातायनोपेतो निर्वातो धीरशब्दवान्।।" (ना.शा. 2.85–86.)

13. रङ्गमञ्चस्य भूमिका एवं हिन्दी नाटकम्– पृ. 9.

14. रङ्गमञ्चस्य भूमिका एवं हिन्दी नाटकम्– पृ.182.

15. "सर्वभावैः सर्वरसैः सर्वकर्मप्रवृत्तिभिः।
नानावस्थान्तरोपेतं नाटकं संविधीयते।।" (ना.शा. 21.124.)

16. सुरेन्द्रवमर्णः नाटकेषु रङ्गंमचीयता– पृ. 11.

17. नटरङ्गविवेकः – पृ. 25.

18. नटरङ्गविवेकः – पृ. 90.

19. भारतीयरङ्गमंचस्य विवेचनात्मकमेतिहासः – पृ. 29.

20. ना.शा. –2.80–83.

21. ना. शा.– 2.86–90.

22. हिन्दी नाटकं : समाजशास्त्रीयाध्ययनम्– पृ. 25.

*23. हिन्दी नाटकं : समाजशास्त्रीयाध्ययनम्– पृ. 34.*

---

# शब्दसंकेतः

1. ना. शा. : नाट्यशास्त्रम्।

# सन्दर्भग्रन्थसूची


| क्र. | ग्रन्थाः | : | लेखकाः |
|---|---|---|---|
| 1. | नटरङ्गविवेकः | : | नरनारायणरायः, प्रकाशकः –सन्मार्ग प्रकाशनं–जवाहरनगरम्, दिल्ली, प्रथमं संस्करणम् – 1981. |
| 2. | नाट्यशास्त्रम् | : | व्याख्याकारः – श्री बाबूशुक्लशास्त्री, प्रकाशकः – चौखम्बा–संस्कृत–संस्थानम्–वाराणसी, द्वितीय संस्करणम्– 1984. |
| 3. | भारतीयरङ्गमंचस्य विवेचनात्मकमेतिहासः | : | डॉ0 अज्ञातः, प्रकाशकः – पुस्तक–संस्थानं–कानपुरम्, प्रथमं संस्करणम् – 1978. |
| 4. | रङ्गमंचस्य भूमिका एवं हिन्दी नाटकम् | : | डॉ0 रघुवरदयाल वार्ष्णेयः, प्रकाशकः – इन्द्रप्रस्थं प्रकाशनम् –दिल्ली, प्रथमं संस्करणम् – 1979. |
| 5. | संस्कृत–आलोचना | : | बलदेवः उपाध्यायः प्रकाशनं – हिन्दी–समितिः, सूचनाविभागः उत्तरप्रदेशः, द्वितीयं संस्करणम् – 1963. |
| 6. | सुरेन्द्रवमर्णः नाटकेषु रङ्गमंचीयता | : | देवेन्द्रकुमारः गुप्ता, प्रकाशकः – भावना–प्रकाशनं दिल्ली, प्रथमं संस्करणम्– 1986. |
| 7. | हिन्दी–नाटकं : समाजशास्त्रीयाध्ययनम् | : | डॉ0 सीतारामः झा 'श्यामः' प्रकाशकः – बिहार–हिन्दी–ग्रन्थाकादमी–पटना, प्रथमं संस्करणम् – 1974. |